Dattatreya Stotram

श्रीदत्तात्रेयस्तोत्रम्

NityaPaath
nityapaath.com/dattatreya-stotram/

SHLOKA · श्लोक

1 जगदुत्पत्तिकर्त्रे च स्थितिसंहारहेतवे।
भवपाशविमुक्ताय दत्तात्रेय नमोऽस्तु ते॥

2 जराजन्मविनाशाय देहशुद्धिकराय च।
दिगंबर दयामूर्ते दत्तात्रेय नमोऽस्तु ते॥

3 कर्पूरकांतिदेहाय ब्रह्ममूर्तिधराय च।
वेदशास्त्रपरिज्ञाय दत्तात्रेय नमोऽस्तु ते॥

4 ह्रस्वदीर्घकृशस्थूलनामगोत्रविवर्जित।
पंचभूतैकदीप्ताय दत्तात्रेय नमोऽस्तु ते॥

5 यज्ञभोक्त्रे च यज्ञाय यज्ञरूपधराय च।
यज्ञप्रियाय सिद्धाय दत्तात्रेय नमोऽस्तु ते॥

6 आदौ ब्रह्मा मध्ये विष्णुरन्ते देवः सदाशिवः।
मूर्तित्रयस्वरूपाय दत्तात्रेय नमोऽस्तु ते॥

7 भोगालयाय भोगाय योगयोग्याय धारिणे।
जितेंद्रिय जितज्ञाय दत्तात्रेय नमोऽस्तु ते॥

8 दिगंबराय दिव्याय दिव्यरूपधराय च।
सदोदितपरब्रह्म दत्तात्रेय नमोऽस्तु ते॥

9 जंबुद्वीपे महाक्षेत्रे मातापुरनिवासिने।
जयमान सतां देव दत्तात्रेय नमोऽस्तु ते॥

10 भिक्षाटनं गृहे ग्रामे पात्रं हेममयं करे।
नानास्वादमयी भिक्षा दत्तात्रेय नमोऽस्तु ते॥

11 ब्रह्मज्ञानमयी मुद्रा वस्त्रमाकाशभूतले।
प्रज्ञानघनबोधाय दत्तात्रेय नमोऽस्तु ते॥

12 अवधूत सदानंद परब्रह्मस्वरूपिणे।
विदेहदेहरूपाय दत्तात्रेय नमोऽस्तु ते॥

13 सत्यरूप सदाचार सत्यधर्मपरायण।
सत्याश्रय परोक्षाय दत्तात्रेय नमोऽस्तु ते॥

14 शूलहस्त गदापाणे वनमालासुकंधर।
यज्ञसूत्रधर ब्रह्म दत्तात्रेय नमोऽस्तु ते॥

15 क्षराक्षरस्वरूपाय परात्परतराय च।
दत्त मुक्तिपरस्तोत्र दत्तात्रेय नमोऽस्तु ते॥

16 दत्तविद्याय लक्ष्मीश दत्तस्वात्मस्वरूपिणे।
गुणनिर्गुणरूपाय दत्तात्रेय नमोऽस्तु ते॥

17 शत्रुनाशकरं स्तोत्रं ज्ञानविज्ञानदायकम्।
सर्वपापं शमं याति दत्तात्रेय नमोऽस्तु ते॥

PHALASHRUTI · फलश्रुति

18 इदं स्तोत्रं महद्दिव्यं दत्तप्रत्यक्षकारकम्।
दत्तात्रेयप्रसादाच्च नारदेन प्रकीर्तितम्॥

Text checked against: Dattatreya Stotra, Nirnaya Sagar Press, Mumbai, 1910 (pocket booklet; Arjan Nath Handoo collection, digitised by eGangotri). Meanings, audio and all scripts at nityapaath.com/dattatreya-stotram/